International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 238-242
© 2025 IJMH
www.themultijournal.com
Received: 04-12-2025
Accepted: 29-12-2025
Publish : 30-12-2025

**विश्वजित् दिण्डा**
संस्कृतविभागः,
विद्यासागरविश्वविद्यालयः,
मेदिनीपुरः, पश्चिमवङ्ग

**Correspondence:**
**विश्वजित् दिण्डा**
संस्कृतविभागः,
विद्यासागरविश्वविद्यालयः,
मेदिनीपुरः, पश्चिमवङ्ग

# सांख्यदर्शने पुरुषस्वरूपविमर्शः

**विश्वजित् दिण्डा**

सांख्यसिद्धान्तानुसारं सृष्ट्यर्थं प्रकृत्या सह पुरुषस्य संयोगऽपेक्षते पुरुषस्य भोगापवर्गरूपार्थसाधनाय गुणेषु क्षोभो जायते। सांख्यप्रकृतिव्यतिरिक्तं पुरुषोऽन्यदेकं मूलतत्त्वम्। पुरुषो न प्रकृतिर्नापि विकृतिः। ईश्वरकृष्णेन पुरुषास्तित्वसिद्धये सप्तदशतमकारिकायां पञ्चयुक्तयः उत्थापिताः। यथा-

**संघातपरार्थत्वात् त्रिगुणादिविपर्यादधिष्ठानात्।**
**पुरुषोऽस्ति भोक्तभावात् कैवल्यार्थप्रवृत्तेश्च[१]।।**

तत्र प्रथमयुक्तिः भवति संघातपरार्थत्वात्। अत्र संघातपदेन पुरुषं विहाय चतुर्विंशतितत्त्वानां ग्रहणं भवति। एतानि संघाततत्त्वानि कस्यचित् असंघाततत्त्वस्य उपभोगार्थमुपयुज्यन्ते। यथा पर्यङ्कारार्थगृहादयः एते परार्था एव। किन्तु पुरुषोऽस्ति यः खलु पर्यङ्के शेते। रथेन गच्छति, गृहे च निवसति।

द्वितीययुक्तिः भवति त्रिगुणादिविपर्ययात्। गुणत्रयं सत्त्वरजस्तमांसि संघातेषु एव तिष्ठन्ति। अतः त्रिगुणादिविपर्ययात् अर्थात् गुणत्रयस्य अभावात् पुरुषोऽस्ति इति अनुमीयते।

तृतीययुक्तिः भवति अधिष्ठानात्। जडपदार्थाः चेतनेन व्यधिष्ठितः सन्तः कार्यक्षमाः भवन्ति। यथा- जडपदार्थः रथः सारथिं विना न चलति तथैव शरीरेन्द्रियादयः जडपदार्थाः अपि अधिष्ठातारं विना न प्रवर्त्तन्ते। अतः अत्र अधिष्ठाता पुरुषः अस्ति इत्यनुमीयते।

चतुर्थयुक्तिः भवति भोक्तृभावात् न बुध्यादीनि तत्त्वानि सुखदुःखेन भोग्यानि भवन्ति। भोक्तारं विना भोग्यपदार्थानां भोगः न भवति। एवञ्च द्रष्टारं विना दृश्यपदार्थानां दर्शनं न भवति। अतः भोक्तृत्वेन पुरुषः सिद्ध्यति।

पञ्चमयुक्तिः तावत् कैवल्यार्थं प्रवृत्तेश्च। कैवल्यार्थं मोक्षार्थं वा केवलं पुरुषः प्रवर्त्तते नान्यः। अतः कैवल्यार्थं प्रवृत्तेश्च पुरुषः अस्तीति अनुमीयते।

**पुरुषबहुत्वसिद्धिः**

सांख्याचार्यैः पुरुषस्य बहुत्वां स्वीक्रियते। प्रसङ्गेऽस्मिन् ईश्वरकृष्णेन युक्तयः प्रदर्शिताः। यथा-

**जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव[२]।।**

अर्थात् जन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धं भवति। सांख्यदर्शने पुरुषोऽपरिणामी कूटस्थो नित्य इति प्रतिपाद्यते। अतः कारिकोक्तजननमरणशब्दौ सिद्धान्तविरोधिनाविति न मन्तव्यम्। यतो नूतनशरीरेन्द्रियमनोऽहङ्कारबुद्धीनां संघातेन सार्द्धपुरुषस्य सम्बन्ध एव जन्मेत्युच्यते। तथा पूर्वगृहीतशरीरादिसंघातस्य परित्याग एव मरणमिति। अत्र जननं मरणं क्रमशः पुरुषस्य जन्मरूपपरिणामस्तथा विनाशो न। अतो जन्ममरणकरणानां व्यवस्थातः पुरुषस्यानेकता सिद्ध्यति। यद्येकः पुरुषः स्यात् तर्ह्येकस्य जन्मनि सर्वे एव जायेरन् एकस्य मरणे सर्वेऽपि म्रियेरन् तथैकस्य करणवैकल्पेवाधिर्यान्धत्वमूकत्वखञ्जत्वं लक्षणे सर्वेपि बधिरान्धमूकखञ्जाः स्युः। परन्तु न चैवं भवति तस्माद् जन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्ध्यति। तथाऽयुगपत् प्रवृत्तेश्च पुरुष बहुत्वस्य सिद्धिर्जायते। सर्वेषां प्रवृत्तिर्युगपत् न भवति। यद्येके धर्मे प्रवृत्ता अन्येऽधर्मे वैराग्येऽन्ये, ज्ञानेऽन्ये प्रवृत्ता भवन्ति। तस्माद् युगपत् प्रवृत्तेश्च बहवः पुरुषाः इति सिद्धम्। किञ्चान्यत् त्रैगुण्यविपर्ययाच्चैव पुरुषबहुत्वसिद्धिः। यथा सामान्ये जन्मनि, एकः सात्त्विकः सुखी, अन्ये राजसो दुःखी, अन्यस्तमसो मोहवानिति दृश्यते। यदि पुरुषः एकः एव स्यात् तर्हि प्राणिष्वेक त्रिगुणभेदो न स्यात्।

अतः स्त्रैगुणविपर्ययात् पुरुषः नैकः अस्ति।

**महाभारते पुरुषतत्त्वम्**

सत्त्वादिगुणानामूर्ध्वे तिष्ठति पुरुषः। अत एव स स्वरूपेण ज्ञानवान्। जागतिकपदार्थानामुत्पत्तिः लयो वा न तस्मात् भवति। यतो हि जागतिकपदार्थानामुत्पत्तिविनाशनिमित्तं च गुणानामावश्यकता अपरिहार्या। पुरुषः निर्गुण इत्यत्र न लेशमात्रेणापि संशयस्यावकाशः। तदुक्तम्-

**"आत्मा परिज्ञानमयो विवादे ह्यस्तीति नास्तीति भिदार्थनिष्ठः।**
**व्यर्थोऽपि नैवोपरमते पुंसा मत्तः परावृत्ताधियां स्वलोकात्[३]।।"**

पुरुषस्य एतादृश शुद्धबुद्धमुक्तस्वभावत्वं विद्यते, इति कृत्वा तस्य प्रकृतितः विवेकज्ञानमावश्यकम्। यतो हि सत्त्वादिगुणसम्पन्नः सन् स सात्त्विकादिकर्माणि अनुतिष्ठति। परन्तु कर्माणि असंत्यानि।

अत एव मिथ्याभूतेभ्यः कर्मभ्यः सम्बन्धं विच्छिद्य स्वस्वरूपावतये यत् कारणरूपं विवेकज्ञानं भवति। तदेव परमलक्ष्यम्। येन तु पुनर्जन्मप्राप्तिर्न भवति। तदेव मोक्षरूपकात्यन्तिकसुखप्राप्तिः[४]।

स्वभावेण पुरुषस्य न बन्धनमिति कृत्वा विवेकज्ञानेनैव तस्य मुक्तिः सम्भविष्यति।

अत एव पुरुषः भवति विवेकनिपुणः। येन सः दृश्यात्मकस्य जगदादिकस्य वा विकल्परहितः। अतः-

**"आसीज्ज्ञानमयो ह्यर्थएकमेवाकल्पितम्।**
**यदा विवेकनिपुणा आदौ कृतयुगोऽयुगे[५]।।"**

अत एव पुरुषस्य न विकल्पः। अर्थात् पुरुषः भवति केवलो निर्गुणश्च। परन्तु परमात्मनः सकाशात् जायमाना प्रकृतिः जगति कार्यकारणरूपं धारयति। द्वितीयस्तु भवति ज्ञानस्वरूपविशेषः पुरुषः। तदुक्तम्-

**"तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका।**
**ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते[६]।।"**

सत्त्वादिगुणानां प्रभावेणैव पुरुषस्य भावना प्रभाविता भवति। अर्थात् गुणानां क्रियाकारित्वं यदा पुरुषाधिष्ठितं भवति, तदा पुरुषः तादृशभावापन्नः सन् सदसत्कर्माणि अनुतिष्ठति। अतएव सत्त्वगुणान्विताः पुरुषाः देवीगुणसम्पन्नाः, रजोगुणविशिष्टास्तु आसुरिगुणसम्पन्नाः तमोगुणप्रभाविताश्च पैशाचिकवृत्ति- सम्पन्नाः भवन्ति। नैतावदपि तु त्रिगुणान्वितः पुरुषः तत्तद्भावनया कर्माण्यनुतिष्ठति। उत उक्तम्-

**"एधमाने गुणे सत्त्वे देवानां बलमेधते।**
**असुराणां च रजसि तमस्युद्धवरक्षसाम्[७]।।"**

पुनश्च सत्त्वादिगुणानां प्रभावेण कर्मसङ्गिमनुष्यस्य सद्सद्योनिषु जन्म भवति। विवेकिनः पुरुषस्य शुभकर्मानुष्ठानेन सात्त्विकसुखं, राजसकर्मणः फलं दुःखं, तामसिककर्मणश्च अज्ञानमिति फलभेदाः अपि सम्भवन्ति।

तदुक्तम् श्रीमद्भगवद्गीतायाम्-

**"रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।**
**तथा प्रलीनस्तमसि मूढयोनिषु जायते।।**
**कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।**
**रजसस्तु फलं दुःखमज्ञानं तामसः फलम्।।**
**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।।**
**ऊर्ध्वं गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः।**
**जघन्यगुणवृत्तिस्थाः अधोगच्छन्ति तामसाः[८]।।"**

पुनश्च मनुष्यस्य जाग्रदाद्यवस्थाविशेषा अपि सत्त्वादिगुणानामुपरि अधितिष्ठन्ति। अर्थात् सत्त्वगुणेन जाग्रदवस्था, रजोगुणेन स्वप्नावस्था, तमोगुणेन च सुषुप्त्यवस्था जायते।

अतः-

**"सत्त्वाज्जागरणं विद्याद् रजसा स्वप्नमादिशेत्।**
**प्रस्वापं तमसा जन्तौस्तुरीयं त्रिषु सन्ततम्[९]।।"**

सत्त्वगुणसम्पन्नः ऊर्ध्वगामी रजोगुणसम्पन्नः मर्त्यलोकगामी तमोगुणसम्पन्नश्च नरकगामी भवति। तदुक्तं-

**"उपर्युपरि गच्छन्ति सत्त्वेन ब्राह्मणाः जनाः**
**तमसाऽधोऽधः आमुख्याद् रजसान्तरचारिणः[१०]।।"**
**"सत्त्वे प्रलीनाः स्वर्यान्ति नरलोकः रजोलयाः।**
**तमोलयास्तु निरयं यान्ति मामेव निर्गुणाः।।**
**मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत्।**
**राजसं फल सङ्कल्पं हिंसाप्रायादितामसम्[११]।।"**

विशुद्धात्मनः ज्ञानं सात्त्विकम्। तस्य कर्तृत्वभोक्तृत्वाभिमानः राजसिकः। पुनश्चात्मानं शरीरमिति ग्रहणं भवति तामसिकम्। परन्तु परमात्मनः स्वरूपं निर्गुणम्। अतः-

**"कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत्।**
**प्राकृतं तामसं ज्ञानं मन्तिष्ठं निर्गुणं स्मृतम्[१२]।।"**

प्रकृतेः स्वरूपं ज्ञात्वा जीवः त्रिगुणरहितः सन् मोक्षाकांक्षी भवति। तदर्थं सत्त्वादिगुणानां स्वरूपाण्यपि अवश्यं ज्ञेयानि। अतः-

**"अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्।**
**यद् विदित्वा विमुच्यते पुरुषः प्राकृतौ गुणैः[१३]।।"**

वस्तुतस्तु स्वात्मदर्शनं नाम स्वस्वरूपावगतिः। यद्बलेन पुरुषः विमुक्तो भवति। अतः-

**"ज्ञानं निःश्रेयसार्थायं पुरुषस्यात्मदर्शनम्[१४]।"**

आत्मा नाम पुरुषः भवति सवर्गः सर्वव्यापी अनादिः निर्गुणः प्रकृतेः स्वयंज्योतिः स्वयं प्रकाशकश्च। लीलाविलासार्थं सवर्गः पुरुषः स्वसमीपमागतस्य त्रिगुणात्मकप्रधानस्य स्वरूपं स्वेच्छया गृह्णाति।

यदा स्वस्वरूपं प्रत्यवगच्छति तदा तस्य मुक्तिः सम्पद्यते। परन्तु संसारलीलायाः आधारस्वरूपा भवति प्रकृतिः। सा च सत्त्वादिगुणैः स्वानुरूपाणि तत्त्वानि प्रसूते। एवम्भूतस्वार्थस्य चरितार्थाय प्रकृतिः नित्यशुद्धबुद्धमुक्त-स्वभावविशिष्टस्य पुरुषस्य ज्ञानमावरणादि-शक्तिद्वारैव आच्छादयति। येन स्वस्वरूपं विस्मृत्य प्रकृत्या साकं संयुक्तो भवति। अपि च संयुक्तः सन् प्राकृतिकरूपं स्वस्वरूपमिति मत्वा प्रकृतिज्ञैः गुणैः क्रियमाणानां कर्मणामहमेव कर्त्ता इति मनुते। अर्थात् तस्य अहङ्कारः समुदेति। तदुक्तं श्रीमद्भागवते-

**"अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः।**
**प्रत्यगात्मा स्वयं ज्योतिर्विश्वं येन समन्वितम्।।**
**स एव प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभूः।**
**यदृच्छयैवोपगतामभ्यापहात लीलया।।**
**गुणैर्विचित्राः सृजती स्वरूपाः प्रकृतिः प्रजाः।**

**विलोक्य ममुहे सद्यः स इह ज्ञानगूहया।।**
**एवं पराभिध्यानेन कर्त्तृत्वं प्रकृतेः पुमान्।**
**कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते[१५]।।"**

कर्त्तृत्वाभिमानेन अकर्त्ता स्वाधीनः आनन्दस्वरूपः पुरुषः जन्ममृत्युरूपं प्रापञ्चिकबन्धनं समुपैति। अतः-

**"तदस्य संवृतिर्बन्धः पारतन्त्र्यं च तत् कृतम्।**
**भवत्यकर्त्तुरीशस्य साक्षिणो निवृत्तात्मनः[१६]।।"**

कार्यकारणकर्त्तृत्वं प्रकृतेरेव। परन्तु भोक्तृत्वाभिमानात् पुरुषः सुखदुःख भुङ्क्ते। कार्यरूपं शरीरं कारणरूपमिन्द्रियं पुनश्च इन्द्रियाधिष्ठि-तदेवतादौ पुरुषः आत्मानमारोप्य अधिष्ठापयति। तच्च नैव समीचीनम्। यतो हि पप्रकृतिस्थः पुरुष एव सुखदुःखादिकं भुनंक्ति न तु शुद्धबुद्धमुक्तस्वभावविशिष्टः केवलः पुरुषः। अतः-

**"कार्यकारणकर्त्तृत्वे कारणं प्रकृतिं विदुः।**
**भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्[१७]।।"**

यादृक् जले प्रतिविम्बितसूर्येण साकं जलस्य शीतलत्वचलत्वादिगुणानां सम्बन्धो न विद्यते तादृक् त्रिगुणात्मिकायाः प्रकृतेः कार्यशरीराश्रि-तत्वेऽपि आत्मा वस्तुतः न तस्याः सुखदुःखादिधर्मेषु लिप्तः भवति। यतो हि स्वभावतः पुरुषः निर्विकारः निर्गुणः अकर्त्ता च। अतः-

**"प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः**
**अविकारादकर्त्तृत्वान्निर्गुणत्वाज्जलार्कवत्[१८]।।"**

परन्तु यदा पुरुषः प्रकृतिजैः गुणैः साकं स्वसम्बन्धं स्थापयति तदा सोऽहंकारविमोहितः भवति। एतादृशाभिमानकारणात् पापपुण्यरूप-कर्मादियुक्तः सन् स्वातन्त्र्यं शान्तत्वञ्च विमुञ्चति। येन संसारचक्रे भ्राम्यमानाः दुःखमनुभवति। अतः-

**"स एषं यर्हि प्रकृतेर्गुणेष्वभिषज्ञते।**
**अहंक्रिया विमुढात्मा कर्त्ताऽस्मत्यभिमन्यते।।**
**तेन संसारपदवीमवशोऽभ्यन्यनिवृत्तिः।**
**प्रासङ्गिकैः कर्मदोषैः सदासन्मिश्रयोनिषु[१९]।।"**

**विष्णुपुराणे पुरुषतत्त्वम्**

विष्णुपुराणेऽपि पुरुषस्वरूपविषये वर्णितं यत् आत्मा स्वभावतः सुखदुःखरहितः शुद्धबुद्धमुक्तस्वभावविशिष्टः निर्वाणमयः। प्रकृतिसंसर्गा-दात्मनः सुखदुःखाद्युपलब्धिर्भवतीति कृत्वा अहमेव कर्त्ता अहमेव भोक्ता इति मन्यते। परन्तु एते धर्माः प्रकृतेः न तु आत्मनः। यतो हि ज्ञानमयो निर्वाणमयोऽपि भवति आत्मा। दुःखाद्यज्ञानमय धर्माः भवन्ति प्रकृतेः। तदुक्तम्-

**"निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः।**
**दुःखज्ञानमयाः धर्माः प्रकृतेऽते तु नात्मनः[२०]।।"**

संसारमोहभ्रमेण वारम्बारं भ्रमित्वा क्लान्तः श्रान्तः पुरुषः स्वस्वचित्तसम्पन्नः भूत्वा निरतिशय-निर्बाध-निर्वाणप्राप्तये चेष्टते। उक्तञ्च-

**"मोहभ्रमे शमं याते स्वस्थान्तःकरणपुमान्।**
**अनन्यातिशयाबाधं निर्वाणमुच्छति[२१]।।"**

दुःखमयत्वं यद्यपि प्रकृतेः गुणः तथापि 'संसर्गजाः दोषगुणाः भवन्ति' इति न्यायेन प्रकृतिसंसर्गे सति पुरुषः अहंकारादिसम्पन्नः सन् प्राकृतधर्मान् आत्मन इव मनुते। परन्तु पुरुषस्तावन्नित्यशुद्ध-बुद्धमुक्तस्वभावसम्पन्नः स्वसम्बन्धस्ता-वज्जला-ग्निन्यायेन सुतरामङ्ग-तस्तथापि सातिशयसान्निध्यवशात् यथा जपाकुसुमगतं लौहित्यं स्फटिकप्रतिबिम्बितं भवति येन शुद्धोऽपि स्फटिकः रक्तवत् प्रतिभासते, तथैवात्र असङ्गोह्यसौ सुखदुःखकर्त्तृभोक्तृत्वरहितोऽप्यात्मानं सुखीदुः खीत्यादिरूपेण आमनति। तदुक्तं सांख्यसूत्रेऽपि-

**"न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगदृतै।"[२२]**

एतदपि सांख्यसारे स्पष्टमभिहितम्।[२३] अपि च विष्णुपुराणे-

**"जलस्य नाग्निसंसर्गः स्थालीसंगात्तथापि हि।**
**शब्दोद्रेकादिकान्धर्मस्तत्करोति यथा नृपः।।**
**भजन्ते प्राकृतान्धर्मान् न्यस्तेभ्यो हि सोऽव्ययः।।"[२४]**

तन्मात्राणां बलवत्वात् एकस्य तन्मात्रस्य उत्पद्यमाने सति अन्यस्य तन्मात्रस्य शक्तिविस्मृतत्वात् एकस्मात् अन्यस्य उत्पत्तिः सम्भवति। यथा च श्रुतौ सृष्टितत्त्वविषये क्रमो लिखितोऽस्ति, तथैव अत्रापि तन्मात्राणामुत्पत्तिविषये स एव क्रम उदाहृतः। तथा च श्रुतौ- "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। एग्नेरापः। अद्भ्यः पृथिवी। पृथिव्याः औषधयः....।"[२५] एवमेवप्रकारेण विशालसंसा-रस्य उत्पत्तिः। परन्तु वैलक्षण्यमेतदेव यत्तत्र चेतनतत्त्वा-दात्मनः सकाशादुत्पत्तिरत्र तु अचेतनतत्त्वम्। प्रकृतेः सकाशादेव एतेषामुत्प-त्तिरिति।

उक्तञ्च-

**"बलवानभवाद्वायुस्तस्य स्पर्शौ गुणो मतः।**
**आकाशस्तु विकुर्वाणः स्पर्शमात्रं समावृणोत्।।"[२६]**

विष्णुपुराणानुसारं परमात्मा विष्णुः क्षेत्रज्ञरूपेण परिकल्पितः। सर्गकाले गुणानां साम्यावस्थापन्ना प्रकृतिः क्षेत्रज्ञस्वरूपं भगवन्तं विष्णुमधिष्ठाय महत्तत्त्वादिकं सृजति। यथोक्तम्-

**"गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञाधिष्टितान्मुने।**
**गुणव्यञ्जनसम्भूतिः सर्गकाले द्विजोत्तम।।"[२७]**

तदेवमत्र यद्यपि सर्वेषां कार्याणां मूलकारणत्वेन ईश्वरः परिकल्पित-स्तथापि प्रकृतेस्तु जगत्प्रत्युपादानकारणत्वमिति निर्विवाद एव। सर्वाण्यपि जागतिकवस्तूनि सुखदुःखमोहात्मकानि इति कृत्वा त्रिगुणात्मिकायाः प्रकृतेरेव कार्याणि। परन्तु जडस्वभावविशिष्टा-यास्तस्याः कार्योत्पादनेऽसामर्थ्यमिति मत्वा चेतनस्वरूपस्येश्वरस्य कल्पना कृताऽस्ति। यतो हि ईश्वरसकाशात् प्रकृतेरुत्पत्तिः। या तु सृज्यशक्तिसम्पन्ना। तदुक्तम्-

**"निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि।**
**प्रधानकारणीभूताः यतो वै सृज्यशक्तयः।।"[२८]**

परन्त्विदमत्रावधेय यदस्मिन् विष्णुपुराणे भगवतो विष्णोः प्राधान्यं प्रकटयितुमजायाः अविकृतायाश्च, प्रकृतेः सृष्टिः तत एवेति प्रतिपादितम्। साऽपि प्रकृतिरन्यत्र कुत्रचिन्मायारूपेण कुत्रचिच्चा-विद्यारूपेण परिकीर्त्तिता। परमात्मनः सकाशात् जाता प्रकृतिः तमोमोहमहामोहतामिस्त्र-अर्धतामिस्त्रादिभेदेन पञ्चपर्वाख्या। उक्तञ्च-

**"तमोमोहो महामोहस्तामिस्त्रोह्यन्धसंज्ञितः।**

**अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः[२९]।।"**

कारणरूपा प्रकृतिः कार्यरूपं महत्तत्त्वं बीजकोषवदाच्छादयति इति कृत्वा महत्तत्त्वं सत्त्वादिगुणसम्पन्नं भवति।

सत्त्वं रजस्तम इति भेदेन त्रिविधगुणस्य आधाररूपा सा परन्तु बीजगतकोषो यथा अङ्कुरमाच्छादयति तथा महत्तत्त्वमपि प्रकृत्या परिव्याप्तं भवति। अतः-

**"सात्त्विकराजसश्चैव तामसश्च त्रिधा महान्।**
**प्रधानतत्वेन समं त्वया बीजमिवावृतम्।।"[३०]**

अन्येषां तत्त्वानां कारणभूता प्रकृतिः अव्यक्तरूपा नित्यसदसदात्मिका भवति। अतः मुनिभिरुक्तम्-

**"अव्यक्तं कारणं यत्तत्प्रधानमृषिसत्तमैः।**
**प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम्।।"[३१]**

प्रलयकालेऽपि अन्यस्य कस्यचित् पदार्थस्य सत्ता नासीत्। परन्तु तदानीमपि केवलमहत्तत्वादीना कारणभूतायाः प्रकृतेः शुद्धबुद्धमुक्त-स्वभावविशिष्टस्य पुरुषस्य च सत्ता आसीत्। अतः अनयोः प्रकृतिपुरुषयोः सम्बन्धो नाम संयोगे सति जगदुत्पत्तिः। येन पुरुषस्य च बन्धापत्तिः। जगदुत्पत्त्यनन्तरमन्येषां तत्त्वानां सम्भवः। तदुक्तम्-

**"नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमोज्योतिरभूच्चनान्यत्।**
**श्रोत्रादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत्।।"[३२]**

संज्ञापरिवर्त्तने सत्यपि यदि कस्यचितसञ्ज्ञिनः किमपि परिवर्त्तनं न भवति तर्हि तदेवपारमार्थिकमित्युच्यते। तथाभूतं पारमार्थिकं वस्तु तावत् भवति चेतनस्वरूप आत्मा पुरुषो वेति। सांख्यसिद्धान्ते तस्य स्वरूपमेव वर्णितमस्ति यत् 'न प्रकृतिर्न विकृतिः पुरुषः'[३३] इति। वस्तुतः वेदान्तदृष्ट्या नामरूपे तावत्परिदृश्यमानस्य प्रकृतिवि-कृत्यात्मकस्य जगतः स्वरूपभूते तद्व्यतिरिक्तस्यैमन्तः पुरुषस्य वा कूटस्थनित्यता च। स च शरीरेऽस्मिन् शरीरित्वेन व्यवस्थितः। 'संघातपरार्थ-त्वा'[३४]दिभिर्युक्तिरधिष्ठानरूपस्य त्रिगुणात्मकस्य प्रकृति-निर्मितस्यैतच्छरीरस्य स एवाधिष्ठाताः एतच्चोपनिषत्सु रथरथिन्या-येन प्रतिपादितम्। तदेव विष्णुपुराणे वर्णितम्-

**"यत्तु कालान्तरेणापि नान्यां संज्ञामुपैति वै।**
**परिणामादिसम्भूतां तद्वस्तु नृप तच्च किम्।।**
**त्वं किमेतच्छिरं किं नु ग्रीवा तव तथोदरम्।**
**किमु पक्षादिकं त्वं वा तवैतत्किं महीपतेः।।"**
**कोऽहमित्यत्र निपुणो भूत्वा चिन्तय पार्थिव।।[३५]**

उपनिषदि तावत्-

**"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिस्तु सारथिं विद्धि मनः प्रगृह्यमेव च।।**
**इन्द्रियाणि हयान्याहुर्विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।"[३६]**

नामजात्यादिसंयुक्तं सुखदुःखमोहात्मकं प्राकृतिकं सर्वमपि वस्तुजातं परिणामतः दुःखभावविशिष्टम्। यदुक्तम्-

"परिणामतापसंस्कारदुःखैर्गुणवृत्ति- विरोधाच्च दुःखमेव सर्व विवेकिनः।"[३७]

शरीरं तदवयवाश्च प्रकृतेः न तु आत्मनः। अतः मनुष्यः यमेव जागतिकपदार्थं प्रियमिति वृणोति स च दुःखवृक्षस्य बीजभूत एव। सत्यं चोक्तम्-

**"यद्यत् प्रीतिकरं पुंसां वस्तु मैत्रेय जायते।**
**तदेव दुखवृक्षस्य बीजत्वमुपगच्छति।।"[३८]**

प्रकृतिसंयोगे सति अज्ञानविवेकश्चशादहङ्कारादियुक्तः सन् अहमेव कर्त्ता अहमेव भोक्ता इत्यादिकं पुरुषे मनुते। तच्च अज्ञानमन्धकारमिव। यथोक्तम्-

**"अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम्।**
**यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम्।।"[३९]**

प्रलयपर्यन्तं यस्य एव जीवस्य किमपि परिवर्त्तनं न भवति नाम 'स्थिरत्वमपरिर्त्तते एतादृशी स्थितावस्था पुराणेषु पुर्नजन्मः इत्युच्यते। अतः-

**"आभूतसम्प्लवं स्थानममृतत्वं विभाव्यते।**
**त्रैलोक्यस्थितिकालोऽयमपुनमरि उच्यते।।"[४०]**

प्राकृतिकाः सत्त्वादिगुणाः पुरुषबन्धनाय त्रिगुणरज्जुरूपाः। श्रौतप्रमाणानुसारं नित्यशुद्धबुद्धमुक्तस्वभावः पुरुषः परन्तु गुणप्रभावात् प्रकृतिसंर्गवशादेवाऽयं नित्यबुद्धो नाम नित्यज्ञानस्वरूपः पुरुषोऽज्ञ इवात्मानं मन्वानः सुखदुःखमोहाभिमानी भवति। परन्तु यः ज्ञानी। तं तथाभूतं ज्ञानवन्तं गुणाः विचालयितुं न क्षमाः भवन्ति। ज्ञानिनः नाम तत्त्वदर्शिनः कर्मयोगिनो ज्ञानयोगिनो वा भवन्तु नाम ते न कर्मानुबन्धिनः भवन्ति। प्रकृतिजन्यसुखाशक्तिः ज्ञानशक्तिश्च सत्त्वगुणेन, रजोगुणेन कर्मसक्तिः तमोगुणेन च प्रमादालस्य निद्रादावासक्तिः जायते। येन जीवात्मनः बन्ध आपद्यते। अतः-

**"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**
**निबध्नन्ति महावाहो देहे देहिनमव्ययम्।।"[४१]**

गुणानां प्रभावेणैव जीवात्मनः बन्धापत्तिः। यतो हि सत्त्वगुणेन सुखप्राप्तिः, रजोगुणेन कर्मापत्तिः, तमोगुणेन च प्रमादादीनामुत्पत्तिः भवति। सत्त्वादिगुणाः तेषां स्वस्वभावेन सुखाद्यासक्तिसु अकृत्स्नविदो नाम अज्ञपुरुषान् कारयतं कुर्वन्ति। एतादृशाविदुषो विषये आलोचितं यत्-

**"सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।**
**कुर्याद्विद्वास्तथासक्तश्चिकीर्षु लोकसंग्रहम्।।**
**न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।**
**जोषयेत् सर्वकर्माणि विद्वान्यक्तः समाचरन्।।"[४२]**

इत्यनेन इदमेव प्रतिपाद्यते यत् कर्मासक्ताः अज्ञानिनः यथा कर्म आचरन्ति अनासक्ताः तत्त्वज्ञा अपि तथा कर्म आचरन्ति। परन्तु तत्त्वज्ञं प्रकृतिर्नैव बध्नाति। अत एव तत्त्वज्ञः कर्मासक्ताज्ञानिनां बुद्धौ भेदं नाम भ्रमं नोत्पादयति। तस्य कृते स्वशक्त्यनुसारं शुभकर्मानुष्ठानं विधेयम्। तदुक्तं श्रीमद्भगवद्गीतायाम-

**"प्रकृतेर्निर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु।**
**तान् कृत्स्नविदो मन्दान् कृत्स्नविन्न कर्माणि विचालयेत्।।"[४३]**

तदिदानीं प्रकृतिजैः गुणैः जायमानानि कर्माणि ममैव इत्याद्यात्मकः पुरुषस्य अहंकारः कथं जायते ?

किमर्थं च तस्य कर्त्तृत्वाभिमानम् इत्यादिकमालोच्यते सर्वाणि अनुष्ठितानि कर्माणि प्रकृतेरेव न तु पुरुषस्य अर्थात् जगदुत्पत्तिः प्रलयश्च प्रकृतिद्वारैव सम्भवति। संसारो भवति जडरूपः। क्रियाधिष्ठानं भवति जड तत्त्वम्। चेतनस्य कापि क्रिया न भवति। यतो हि चेतनः पुरुषः शुद्धबुद्धमुक्तस्वभावविशिष्टः। परन्तु अहंकारात् पुरुषः स्वयमेव कर्त्ता इति मनुते। वस्तुतस्तु कर्त्तृत्वाभिमानस्याश्रयः प्रकृतिः न पुरुषः। येन समष्टिशक्तिद्वारा जायमानानां शरीरादीनां ह्रासबृद्धी भवतः। यत्तु प्रकृतिजानां गुणानां कार्यम्। अहंकारो भवति अन्तःकरणस्य वृत्तिः, पुरुषः स्वयमन्तःकरणवृत्तेः ज्ञाता। परन्तु भ्रमवशात् पुरुषः कर्त्तृत्वपदेन स्वयमेवारूढ इति कृत्वाऽसौ विमुढात्मा इत्युच्यते।

यद्यपि सर्वाणि कर्माणि प्रकृतिजैः गुणैः सम्पाद्यन्ते तथापि अहंकारविमोहितो जीवात्मा (अज्ञः) केषांचित् कर्मणां अहमेव कर्त्ता इति स्वीकरोति। अर्थात् अहमेव अहंकारस्वरूप इति मनुते। अहंकाररूपादज्ञानात् शरीरेन्द्रियमन आदिषु ममत्त्वं जायते। येन शरीरेन्द्रियादिकं ममैव इति मनुते। परन्तु एतादृशः विपरीतज्ञानस्य निराकरणं केवलं पुरुषेण सम्भविष्यति इदं पदेन यथा शरीरस्य ग्रहणं तथा अहंकारस्यापि च। अतः कदाचिदपि 'इदम्' पदेन अहं स्वीकरोति तदा सोऽहंकार विमूढात्मा इत्युच्यते।

वस्तुतोऽहमिति कथनेन वास्तविकमवास्तविकमित्यवस्थाद्वयमवबोध्यते। वास्तविकोऽहमित्यस्य तात्पर्यं भवति 'अहमस्मि' इत्यनेन आत्मनः सत्तास्वीकारः। अवास्तवाहमिति कथनेन शरीरोपाधियुक्तस्य ग्रहणम्। अत एव वास्तविक 'अहम्' स्वाभाविकः नित्यश्च। यत्र 'अवास्तवाहं' तत्र प्राकृतिकं शरीरमस्वाभाविकमनित्यञ्च। अतः 'वास्तविकाहम्' इत्यस्य विस्मृतिः भवितुमर्हति परन्तु न विनाशः। यतो हि आत्मा भवति अविनाशी। अवास्तवे अहं प्रतीयमानसत्त्वेऽपि नासौ अविनाशी। अत एव भ्रमवशात् स्वस्वरूपं आत्मनः विस्मरणपूर्वकं अनित्यस्वरूपं शरीरं गृह्नाति।

चलनं भ्रमणं शयनं समाधित्यादिक्रियाः केवलं प्रकृतौ भवन्ति। चेतनरूपे पुरुषे एतादृशी काऽपि न सम्भवति। यतो हि चेतनं भवति क्रियारहितं सर्वेषां प्रकाशकञ्च।

परन्तु यथा समुद्रं तरङ्गस्य किमपि स्वतन्त्रमस्तित्वं न विद्यते। तथैव पुरुषं विना शरीरस्यापि अस्तित्वं न स्थास्यति। येन च अहंकारविमोहितः अन्तःकरणयुक्तः पुरुषः शरीरमेव स्वरूपमिति मत्वाऽहमेव कर्त्ता अहमेव भोक्ता, ममैषः पुत्र इत्याद्यात्मकोऽभिमानो भवति।

**पादटीका**

१.सां.का.-१७
२.सां.का.-१८
३.श्री.भा.-११/२२/३३
४.श्री.भा.-११/२२/३५-३६
५.श्री.भा.-११/२४/२
६.श्री.भा.-११/२४/४
७.श्री.भा.-११/२५/१९
८.श्री.भा.गी.-१४/१५-१८
९.श्री.भा.-११/२५/२०
१०.श्री.भा.-११/२५/२१
११.श्री.भा.-११/२५/२२-२३
१२.श्री.भा.-११/२५/२४
१३.श्री.भा.-३/२६/१
१४.श्री.भा.-३/२६/२
१५.श्री.भा.-३/२६/३-७
१६.श्री.भा.-३/२६/८
१७.श्री.भा.-३/२६/९
१८.श्री.भा.-३/२७/१
१९.श्री.भा.-३/२७/२-३
२०.वि.पु.-६/७/२२
२१.वि.पु.-६/७/२१
२२.सां.सू.-१/१९
२३.सां.सा.पृ.-५२
२४.वि.पु.-६/७/२३-२४
२५.तै.उ.-२/१/७
२६.वि.पु.-१/२/३८
२७.वि.पु.-१/२/३३
२८.वि.पु.-१/४/५१
२९.वि.पु.-१/२/३८
३०.वि.पु.-१/२/३४-३५
३१.वि.पु.-१/२/१९
३२.वि.पु.-१/२/२३
३३.सां.का.-३
३४.सां.का.-२७
३५.वि.पु.-२/१३/१००-१०३
३६.क.उ.-१/३/३-४
३७.यो.सू.-/२/१५
३८.वि.पु.-६/५/५५
३९.वि.पु.-६/५/६२
४०.वि.पु.-२/८/९५
४१.श्री.भ.गी.-१४/५
४२.श्री.भ.गी.-३/२५-२६
४३.श्री.भ.गी.-३/२९